# अभ्यासप्रश्नपत्रम् - 2023-2024

## संस्कृतम् (केन्द्रिकम्)

## Sanskrit Core (322)

## कक्षा – XII

**समयः – होरात्रयम्** **पूर्णाङ्काः - 80**

**सामान्यनिर्देशाः -**

- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे - पृष्ठानि मुद्रितानि सन्ति।
- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रमुखाः प्रश्नाः सन्ति।
- अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।
- उत्तरलेखनात् पूर्वं प्रश्नपत्रानुसारं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
- प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
- सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
- प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

**प्रश्नपत्रस्वरूपम् -**

**अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति -**

| | |
|---|---|
| **खण्डः (क) अपठित-अवबोधनम्** | **- 10 अङ्काः** |
| **खण्डः (ख) रचनात्मककार्यम्** | **- 15 अङ्काः** |
| **खण्डः (ग) अनुप्रयुक्तव्याकरणम्** | **- 20 अङ्काः** |
| **खण्डः (घ) I. पठित-अवबोधनम्** | **- 25 अङ्काः** |
| **II. संस्कृत - साहित्येतिहास - परिचयः** | **- 10 अङ्काः** |

| खण्डः – क<br><br>अपठित – अवबोधनम् - 10 अङ्काः | | |
|---|---|---|
| 1. | अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानामुत्तराणि संस्कृतेन लिखत –<br><br>"संहतिः कार्यसाधिका' इति वचनं जगति प्रसिद्धमस्ति। एकेन पुरुषेण किमपि महत्कार्यं न साध्यते । यत्किमपि साधयितुं नराणां संघः परमावश्यकः । सर्वे जानन्ति यत् न एकः तन्तुः किमपि कर्तुं समर्थः । परन्तु तैः रचिता रज्जुः हस्तिनमपि बद्धुं समर्था भवति । इत्थमेव एकेन तण्डुलेन नहि ओदनं पच्यते । गृहेषु मातरः पितरः भ्रातरः च एकीभूय गृहभारं वहन्तः सुखमनुभवन्ति । एवमेव मनुष्याणां समाजोऽपि देशं जातिञ्च उन्नतिपथं नेतुं समर्थः भवति । यस्मिन् राष्ट्रे सर्वे मानवाः, सर्वाणि राज्यानि च भेदभावं परित्यज्य एकतया व्यवहरन्ति तद्राष्ट्रं जनशक्त्या संसारस्य मुकुटमणिरिव समुज्ज्वलं भवति। एकतायाः प्रभावेण भारतीयाः स्वदेशम् आंग्लहस्तात् मोचयितुं समर्थाः अभवन् । अतः सदा सर्वैः मानवैः संघे स्थित्वा स्वशक्तेः सञ्चयः कर्तव्यः । अधुनापि यदि वयं संघीभूय स्थास्यामः तर्हि अवश्यमेव शत्रून् जेतुं समर्थाः भविष्यामः ।<br><br>**(अ) एकपदेन उत्तरत - केवलं प्रश्नद्वयम्**<br><br>(i) मानवैः संघे स्थित्वा कस्याः सञ्चयः कर्तव्यः?<br><br>(ii) किमपि साधयितुं केषां संघः परमावश्यकः ?<br><br>(ii) रज्जुः कं बद्धुं समर्था भवति ?<br><br>**(आ) पूर्णवाक्येन उत्तरत - केवलं प्रश्नद्वयम्**<br><br>(i) जगति किं प्रसिद्धमस्ति ?<br><br>(ii) राष्ट्रं कथं समुज्ज्वलं भवति ?<br><br>iii) वयं कथं शत्रुसैनिकान् जेतुं समर्थाः भविष्यामः ।<br><br>**(इ) अनुच्छेदस्य (द्वित्रिशब्दात्मकं) समुचितं शीर्षकं लिखत।**<br><br>**(ई) यथानिर्देशम् उत्तरत- केवलं प्रश्नत्रयम्** | 10<br><br>1×2=2<br><br>2×2=4<br><br>1×1=1<br><br>1×3=3 |

(i) **"निर्मिता" इत्यर्थे किं पदं गद्यांशे प्रयुक्तम् ?**

(क) प्रभावः (ख) समर्था

(ग) रचिता (घ) भवति

(ii) **"भारतीयाः स्वदेशम् आंग्लहस्तात् मोचयितुं समर्थाः अभवन्" । इत्यत्र 'अभवन्" इति क्रियापदस्य किं कर्तृपदं प्रयुक्तम् ?**

(क) भारतीयाः (ख) समर्थाः

(ग) आंग्लहस्तात् (घ) स्वदेशम्

(iii) **"सर्वैः" इत्यस्य विशेषणपदस्य किं विशेष्यमत्र प्रयुक्तम्?**

(क) सदा (ख) स्वदेशम्

(ग) मोचयितुं (घ) मानवैः

(iv) **"अनेकतायाः" इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?**

(क) जनशक्त्या (ख) एकतायाः

(ग) भारतीयाः (घ) परित्यज्य

## खण्डः – ख

## रचनात्मक–कार्यम् - 15 अङ्काः

**2.** भवान् आदित्य:। मुम्बै नगरे वसति । भवान् गतसप्ताहे संस्कृतसंभाषणशिबिरे भागं गृहीतवान्। तदधिकृत्य मित्रं रमेशं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तशब्दैः रिक्तस्थानानि पूरयित्वा पुनः लिखतु – **½×10=5**

**मञ्जूषा**

| |
|---|
| अभिनयम्, अभ्यासम्, पितृभ्यां, विद्यालये, मञ्चनम्, आयोजितम्, करतलध्वनिम्, करोमि, रमेश, करोतु । |

| | | |
|---|---|---|
| | मुम्बैतः<br><br>तिथिः- --------------<br><br>प्रिय मित्र (i)----------<br><br>सस्नेहं नमः ।<br><br>अत्र कुशलं तत्रास्तु। गतसप्ताहे अस्माकं (ii) --------- संस्कृतसम्भाषणशिबिरम् (iii) ----- आसीत् । चतुर्दशदिनानि यावत् वयं संस्कृतसंभाषणस्य (iv) -------- अकुर्म । तत्र एकस्याः लघुनाटिकायाः (v) --------- अपि अभवत् । अहं तु विदूषकस्य (vi) -------- कृतवान् । सर्वे जनाः हसित्वा हसित्वा (vii) ---------अकुर्वन् । अहम् इदानीं सर्वदा संस्कृतेन एव संभाषणम् (viii) ---------। भवान् अपि संस्कृतेन संभाषणस्य अभ्यासं (ix) -------। (x) ---------- मम प्रणामाञ्जलिं निवेदयतु ।<br><br>भवतः मित्रम्<br><br>आदित्यः । | |
| | | |
| **3.** | **मञ्जूषाप्रदत्त-पदसहायतया अधोलिखितां कथां पूरयत -**<br><br>कस्मिंश्चित् नगरे कश्चन दरिद्रः ब्राह्मणः वसति स्म। सः भिक्षाटनेन जीविकार्जनं करोति स्म। कदाचित् सः पिष्टेन पूर्णम् एकं i) ---------प्राप्तवान् । तं घटं नागदन्ते अवलम्ब्य तस्य अधः उपविश्य सः एकदृष्ट्या घटमेव पश्यति स्म। एकदा रात्रौ सः - ii) ---------- यदि देशे दुर्भिक्षः भवेत् तर्हि एतस्य शतरूप्यकाणां मूल्यं भवेत्। तदा अहम् एतत् विक्रीय तेन धनेन अजद्वयं क्रेष्यामि । कालान्तरे तेन iii) ------------एव भविष्यति । अनन्तरम् अजसमूहं iv) ---------धेनूः क्रेष्यामि । अनन्तरं ताः विक्रीय महिषीः ताः विक्रीय अश्वान् च क्रेष्यामि । तान् अपि विक्रीय यथेष्टं धनं v) ----------। बृहत् गृहं निर्मापयिष्यामि । तदा कश्चित् vi)----------आगत्य रूपवतीं स्वकन्यां मह्यं दास्यति । अनन्तरं मम पुत्रः जनिष्यते देवशर्मा इति तस्य vii) ----------करिष्यामि । यदा सः जानुभ्यां चलितुं समर्थः भविष्यति तदा अहम् अश्वशालायां viii) ----------पठिष्यामि । तदा देवशर्मा जानुभ्यां चलन् मम समीपम् | **½×10=5** |

| | | |
|---|---|---|
| | आगन्तुम् उद्युक्तः भविष्यति । तदा तं बालं ग्रहीतुं तस्य ix) ---------आज्ञापयिष्यामि। यदा सा मम वचनं न श्रोष्यति तदा अहं कोपेन पादप्रहारेण तां दण्डयिष्यामि एवं चिन्तयन् सः x) -----------कृतवान् एव । पिष्टेन पूर्णः घटः पतितः, भग्नः च। "<br><br>**मञ्जूषा-**<br><br>सम्पादयिष्यामि , विक्रीय , ब्राह्मणः , चिन्तितवान् , नामकरणं, पादप्रहारं , मातरम् , घटं , अजसमूहः , पुस्तकम्<br><br>**अथवा**<br><br>**अधोलिखितसंवादे रिक्तस्थानानि पूरयत-**<br><br>तन्वी- सखि अवनि! भवती ह्यः विद्यालयं न आगतवती । अपि कुशलिनी त्वम्?<br><br>अवनि - तन्वि ! i) --------------------------------- ।<br><br>तन्वी- तर्हि ह्यः विद्यालयं किमर्थं नागता ?<br><br>अवनि – ii) ------------------------------------------।<br><br>तन्वी- अहो! पक्षिविहारम् अगच्छत्। बहूत्तमम्। कुत्रास्ति पक्षिविहारः ?<br><br>अवनि- iii) --------------------------------------- ।<br><br>तन्वी- 'नोएडा' इति नगरस्थस्य पक्षिविहारस्य विषये तु अहमपि श्रुतवती। के के खगाः दृष्टाः तत्र ?<br><br>अवनि – तत्र अनेके दुर्लभाः खगाः दृष्टाः, यथा काष्ठकूटः, नीलकण्ठः विविधाः चटकाः च ।<br><br>तन्वी- अहो ! दुर्लभाः खगाः अपि दृष्टाः । अस्माकं पितरः तु कथयन्ति यत् तेषां शैशवावस्थायाम् अनेके खगाः गृहेषु इतस्ततः विचरन्ति स्म। | 1×5=5 |

| | | |
|---|---|---|
| | अवनि - वस्तुतः अद्यत्वे नगरेषु तु पक्षिणां दर्शनं प्रायः दुर्लभमेव।<br>तन्वी - सत्यं वदति भवती । iv) ---------------------------------- ।<br>अवनि - भवती अपि पक्षिविहारं द्रष्टुम् अवश्यं गच्छतु ।<br>तन्वी - आम् सखि! v) ----------------------------------- । | |
| | | |
| 4. | **निम्नलिखितवाक्येषु केषाञ्चन पञ्चवाक्यानां संस्कृतेन अनुवादं कुरुत –**<br>1. तुम खेलने कब जाओगे ?<br>when will you go to play.<br>2. लतिका और कनिका पढ रही हैं।<br>Latika and Kanika are studying.<br>3. क्या मैं बाहर जाऊँ ?<br>shall I go to play?<br>4. तुम सब यहाँ क्या कर रहे हो ?<br>what are you all doing here?<br>5. चेतन चित्र बना रहा है।<br>Chetan is drawing a picture.<br>6. आज बुधवार है।<br>Today is Wednesday. | 1×5=5 |
| | | |
| **खण्डः - ग**<br>**अनुप्रयुक्तव्याकरणम् 20 अङ्काः** | | |
| 5. | अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत- (केवलं प्रश्नषट्कम्)<br>i. मद्गार्हस्थ्यं तु **त्वत्+अधीनं** भविष्यति।<br>ii. ततो **यान्ति+अधमां** गतिम् ।<br>iii. यद्यपि **देवादेशः** प्रमाणम् । | 1×6=6 |

| | | |
|---|---|---|
| | iv. शठः **सहस्रैरपि** शिक्ष्यमाणः।<br>v. दीपस्य समीपमागत्य **संन्यासिनोक्तम्।**<br>vi. वैवस्वतो **<u>मनुर्नाम</u>** मनीषिणां माननीयः।<br>vii. **तावन्मम** बालभाव:स एव । | |
| | | |
| 6. | **अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं समस्तपदं विग्रहवाक्यं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत – (केवलं प्रश्नपञ्चकम्)**<br><br>(i) **ज्ञानोदधि**: अनन्तपारः।<br>(क)ज्ञानस्य उदधि: (ख) ज्ञाने उदधि:<br>(ग) ज्ञानम् उदधि: (घ) ज्ञानाय उदधि:<br><br>(ii) एकेनापि सुपुत्रेण **विद्यायुक्तेन** साधुना।<br>(क) विद्यां युक्तेन (ख) विद्याया:युक्तेन<br>(ग) विद्यया रहितेन (घ) विद्यया युक्तेन<br><br>(iii) स एव **<u>उचितम् अनतिक्रम्य</u>** व्यवहरिष्यति।<br>(क) सोचितम् (ख) यथोचितम्<br>(ग) यदोचितम् (घ) श्लाघाविपर्यय:<br><br>(iv) त्यागाय **मितं भाषन्ते ये तेषाम्।**<br>(क)मितभाषिणाम् (ख) मितभाषी<br>(ग)मितभाषिण: (घ)मितभाषिन्<br><br>(v) परमात्मा **<u>अनश्नन्</u>** एव अभिचाकशीति।<br>(क) अन् अश्नन् (ख) अन् श्नन्<br>(ग) न अश्नन् (घ) न श्नन् | 1×5=5 |

| | | |
|---|---|---|
| | (vi) **आचार्यदेवो** भव ।<br>(क) आचार्यस्य देव: (ख) देव: एव आचार्य:<br>(ग) देवस्य आचार्य: (घ) आचार्य: देवो यस्य स: | |
| | | |
| 7. | **अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृतिं प्रत्ययं प्रदत्तविकल्पेभ्यः चिनुत – (केवलं प्रश्नषट्कम्)**<br>(i) तदन्वये शुद्धिमति **प्रसूत:** शुद्धिमत्तर:।<br>(क) प्र+सू+क्तिन् (ख) प्र+सू+क्तवतु<br>(ग) प्र+सू+क्त (घ) प्र+सू+तल्<br>(ii) किं क्षमा **निर्मनस्वि+ तल्** ।<br>(क) निर्मनस्वित (ख) निर्मनस्वित्वम्<br>(ग) निर्मनस्वितला (घ) निर्मनस्विता<br>(iii) ताते धनुर्न मयि सत्यम्- **अव + ईक्ष् + शानच्** ।<br>(क) अवेक्ष्यमाणे (ख) अवीक्षशानच्<br>(ग) अवीक्षशानः (घ) अवीक्षमाने<br>(iv) **युज्+क्त** आयुक्ताःच यथा वर्तेरन् तथा वर्तेथा:।<br>(क) युक्तः (ख) युज्क्ताः<br>(ग) युक्ताः (घ) युधन्<br>(v) **एकाकिनी** एव नर्तिष्यसि \| | 1×6=6 |

| | | |
|---|---|---|
| | (क) एकाकिन् +इनी (ख) एकाकिन्+ङीप्<br>(ग) एकाकिन्+ई (घ) एकाकिन्+इनि<br><br>(vi) यान्यनवद्यानि कर्माणि तानि **सेव्+तव्यत्** ।<br>(क) सेवितव्यत् (ख) सेवतव्यम्<br>(ग) सेवितव्यानि (घ) सेवितव्यतानि<br>(vii) भगवन् ! **संन्यास+इनि** तुरीयाश्रमसेवीति प्रणम्यते।<br>(क) संन्यासिनि (ख) संन्यासी<br>(ग) संन्यासिनी (घ) संन्यासिन् | |
| | | |
| 8. | **कोष्ठकप्रदत्तपदैः सह समुचितां विभक्तिं प्रयुज्य रिक्तस्थानपूर्तिं कृत्वा लिखत –**<br>**(केवलं प्रश्नत्रयम्)**<br>(i) राजा राज्यं................ दत्त्वा तदुत्सङ्गे भोज मुमोच।<br>(क) मुञ्जम् (ख) मुञ्जाय<br>(ग) मुञ्जस्य (घ) मुञ्जे<br>(ii) द्वादशवर्षेण...............अनुगम्यमान: संन्यासी दृष्ट:।<br>(क) भिक्षावटुना (ख) भिक्षावट्वे<br>(ग) भिक्षावटुभि: (घ) भिक्षावटुम्<br>(iii) ........... न प्रमदितव्यम् ।<br>(क) स्वाध्येन (ख) स्वाध्यायस्य | 1×3=3 |

| | | |
|---|---|---|
| | (ग) स्वाध्याये (घ) स्वाध्यायात्<br><br>(iv) दिलीपस्य --------- सदृशागमः आसीत् ।<br><br>(क) प्रज्ञां (ख) प्रज्ञासु<br><br>(ग) प्रज्ञया (घ) प्रज्ञायाः | |
| | | |
| | **खण्डः – घ भागः - I**<br><br>**पठितांशावबोधनम् 25 अङ्काः** | |

| | | |
|---|---|---|
| 9. | **अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत –**<br><br>श्लोकमिमम् अधीत्य शोकसन्तप्तो मुञ्जः प्रायश्चित्तं कर्तुं आत्मनो वह्नौ प्रवेशनं निश्चितवान्। राज्ञः वह्निप्रवेशकार्यक्रमं श्रुत्वा वत्सराजः बुद्धिसागरं नत्वा शनैः-शनैः प्राह- तात! मया भोजराजो रक्षित एवास्ति। पुनः बुद्धिसागरेण तस्य कर्णे किमपि कथितम्, यन्निशम्य वत्सराजः ततो निष्क्रान्तः। पुनः राज्ञो वह्निप्रवेशकाले कश्चन कापालिकः सभां समागतः । सभामागतं कापालिकं दण्डवत् प्रणम्य मुञ्जः प्रावोचद्-हे योगीन्द्र ! महापापिना मया हतस्य पुत्रस्य प्राणदानेन मां रक्षेति । अथ कापालिकस्तं प्रावोचद्-राजन्! मा भैषीः । शिवप्रसादेन स जीवितो भविष्यति। तदा श्मशानभूमौ कापालिकस्य योजनानुसारं भोजः तत्र समानीतः। 'योगिना भोजो जीवितः' इति कथा लोकेषु प्रसृता । पुनः गजेन्द्रारूढो भोजो राजभवनमगात्। संतुष्टो राजा मुञ्जः भोजं निजसिंहासने निवेश्य निजपट्टराज्ञीभिश्च सह तपोवनभूमिं गत्वा परं तपस्तेपे। भोजश्चापि चिरं प्रजाः पालितवान्।<br><br>**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br><br>(क) राज्ञ: वह्निप्रवेशकाले कः सभाम् आगतः ?<br><br>(ख) कः गजेन्द्रारूढ: भूत्वा राजभवनम् अगात्?<br><br>(ग) कस्य योजनानुसारं भोजः श्मशानभूमौ समानीतः ?<br><br>**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br><br>(क) सभामागतं कापालिकं दण्डवत् प्रणम्य मुञ्जः किं प्रावोचद् ?<br><br>(ख) शोकसन्तप्त: मुञ्जः प्रायश्चित्तं कर्तुं किं निश्चितवान्?<br><br>(ग) कापालिक: किं प्रावोचद् ?<br><br>**इ. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्)**<br><br>(क) 'पालितवान्' इति क्रियापदस्य कर्तृपदं किम्?<br><br>(ख) 'आकर्ण्य' इत्यस्य पर्यायपदं किम् ?<br><br>(ग) 'सभामागतं कापालिकं' इत्यनयो: विशेषणपदं किम् ? | 5<br><br>½×2=1<br><br>1×2=2<br><br>1×2=2 |

| | | |
|---|---|---|
| 10. | **अधोलिखितं पद्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत -**<br><br>**प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ।**<br>**न शौचं नापि चाऽऽचारो न सत्यं तेषु विद्यते ॥**<br>**एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ।**<br>**प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः।।** | **5** |
| | **अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** | **½×2=1** |
| | (क) आसुराः जनाः कस्य क्षयाय प्रभवन्ति ?<br>(ख) कीदृशाः जनाः प्रवृत्तिं निवृत्तिं च न विदुः ?<br>(ग) उग्रकर्माण: जना: काम् अवष्टभ्य क्षयाय प्रभवन्ति ? | |
| | **आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** | **1×2=2** |
| | (क) आसुरेषु मनुजेषु किं किं न विद्यते?<br>(ख) कीदृशाः जनाः जगतः क्षयाय प्रभवन्ति?<br>(ग) आसुराः जनाः किं न विदुः ? | |
| | **इ. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्)** | **1×2=2** |
| | (क) 'विनाशाय' इत्यर्थे किं पदमत्र प्रयुक्तम् ?<br>(ख) 'असत्यम्' इत्यस्य किं विपर्ययम् प्रयुक्तमत्र ?<br>(ग) 'एताम्' इतिविशेषणस्य किं विशेष्यम् अत्र प्रयुक्तम्? | |
| | | |

| | | |
|---|---|---|
| 11. | **अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत -**<br><br>**ऋतध्वजः - आम्! अत एव प्रष्टुमुत्सहे किं गन्धर्वराजविश्वावसुमहाभागाः अपि स्वपत्नीं युधिष्ठिर इव हारितवन्तः हरिश्चन्द्र इव विक्रीतवन्तः ?**<br><br>**कुण्डला - मदालसे तूर्ष्णीं किमर्थं तिष्ठसि? देहि प्रत्युत्तरम्।**<br><br>**ऋतध्वजः -एकस्य अपराधेन सर्वा जातिः दण्ड्या इति विचित्रो न्यायः तव सख्याः ।**<br><br>**मदालसा - अत्रभवन्तः नारीस्वाधीनतामधिकृत्य किं कथयन्ति ?**<br><br>**ऋतध्वजः - माता एव प्रथमा आचार्या इत्यस्ति मे अवधारणा। नारी एव समस्तसृष्टेः निर्मात्री । परं कथनेन किम्? परीक्ष्य एव ज्ञास्यति अत्रभवती। परीक्षार्थमुद्यतोऽस्मि गृहस्थाश्रमप्रयोगशालायाम्।**<br><br>**मदालसा- स्वीकृतः प्रस्तावः ।**<br><br>**कुण्डला- दिष्ट्या वर्धेथां युवाम्। मित्रवर, गन्धर्वकन्या मदालसा गान्धर्वविवाह-विधिना वृणोति अत्रभवन्तम्। आकारये अहं कुलगुरुं तुम्बुरुम्। असौ अग्निं साक्षीकृत्य आशीर्वचांसि वक्ष्यति।**<br><br>**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br><br>(क) नारी कस्याः निर्मात्री ?<br><br>(ख) कुलगुरु तुम्बुरुः किं वक्ष्यति ?<br><br>(ग) मदालसा केन विधिना ऋतध्वजं वृणोति ?<br><br>**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br><br>(क) मदालसा किं पृच्छति ?<br><br>(ख) ऋतध्वजः किमर्थम् उद्यतः आसीत्?<br><br>(ग) ऋतध्वजः किं प्रष्टुम् उत्सहते ? | **5**<br><br>**½×2=1**<br><br>**1×2=2** |

| | | |
|---|---|---|
| | **इ. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(क) "मौनम्" इत्यस्य समानार्थकपदं नाट्यांशात् चित्वा लिखत ।<br>(ख)"पराधीनता" इत्यस्य विलोमपदं नाट्यांशात् चित्वा लिखत ।<br>(ग) 'विचित्रो न्याय: तव सख्या: " इत्यस्मिन् वाक्ये "तव" इति सर्वनामपदं कस्मै प्रयुक्तम् ? | 1×2=2 |
| | | |
| 12. | **अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत –**<br><br>**एकेनापि सुपुत्रेण विद्यायुक्तेन साधुना।**<br>**आह्लादितं कुलं सर्व यथा चन्द्रेण शर्वरी ।**<br><br>**भावार्थ:** - यथा एकाकिना (क)------------एव रात्रिः (ख)----------- भवति, तथैव एकेन (ग)-----------सुपुत्रेण सम्पूर्ण: वंशः प्रसन्नतां याति ।<br><br>**मञ्जूषा-**<br>**विद्यायुक्तेन ,चन्द्रेण , सुशोभिता**<br><br>**अथवा**<br>**प्रदत्ते भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत-**<br>(अ) **कर्माण्यारभमाणं हि पुरुषं श्रीर्निषेवते।**<br>क य: मनुष्य: कर्माणि आरभते स: समृद्धिं प्राप्नोति<br>ख पुरुष: श्रियं न प्राप्नोति | 1×3=3<br><br>1×3=3 |

| | | |
|---|---|---|
| | ग  कर्मणा पुरुष: लक्ष्मीं न निषेवते।<br><br>(आ) **दोषेषु यत्नः सुमहान् खलानाम् ।**<br>क  महतां जनानां दोषेषु यत्न: भवति।<br>ख  दुष्टजनानां दोषेषु एव यत्न: भवति।<br>ग  दुष्टकार्येषु प्रयत्न: न करणीय:।<br><br>(इ) **द्वेष्योऽपि सम्मतः शिष्टस्तस्यार्तस्य यथौषधम्।**<br>क  राज्ञे: सज्जनः सदैव शत्रुवत् भवति स्म यथा रुग्णाय औषधम्<br>ख  राज्ञे सज्जनः शत्रुः सन्नपि सम्माननीयः आसीत् यथा रुग्णाय औषधम् ।<br>ग  रोगी जन: कदापि औषधं न स्वीकरोति औषधं तस्य शत्रु इव । | |
| | | |
| 13. | **अधोलिखित- श्लोकस्य प्रदत्ते अन्वये रिक्तस्थानपूर्तिं कुरुत –**<br><br>**असौ मया हतः शत्रुर्हनिष्ये चापरानपि ।**<br>**ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी ।।**<br><br>**अन्वय:-**<br>असौ शत्रुः मया हतः (i) .........अपि च (अहम्) हनिष्ये । (ii) ......भोगी, अहम् (iii) ........ अहं सिद्धः बलवान् सुखी (चास्मि) ।<br><br>**मञ्जूषा -**<br>**अहम् , ईश्वर: , अपरान्** | 1×3=3 |
| | | |
| 14. | **‘क’ स्तम्भस्य वाक्यांशस्य ‘ख’ स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत -** | ½×4=2 |

| | | | |
|---|---|---|---|
| | **'क' स्तम्भः** / **'ख' स्तम्भः**<br>(i) स्वायत्तमेकान्तगुणं विधात्रा। — (क) केवलं जन्महेतवः ।<br>(ii) आचार्याय प्रियं धनमाहृत्य — (ख) स ताभ्यो बलिमग्रहीत् ।<br>(iii) स पिता पितरस्तासां — ( ग) प्रजातन्तुं मा व्यवछेत्सीः।<br>(iv)प्रजानामेव भूत्यर्थं — (घ)विनिर्मितं छादनमज्ञतायाः।। | |
| | | |
| 15. | **अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रसंगनुसारं शुद्धम् उत्तरं मंजूषायाः चित्वा लिखत –**<br>**(केवलं प्रश्नचतुष्टयम्)**<br>क शुल्के **<u>विपणितं</u>** राज्यं पुत्रार्थे यदि याच्यते ।<br>ख अक्षोभ्यः लक्ष्मणः **<u>क्षोभितः</u>** ।<br>ग ततः **<u>पुरतः</u>** पश्यन् अवादीत् ।<br>घ भवान् **<u>तुरीय</u>**- आश्रमसेवीति प्रणम्यते ।<br>**मञ्जूषा-**<br>**कोपितः , चतुर्थः, विक्रीतम् , समक्षम् ,** | ½×4=2 |
| | | |

## खण्डः – घ

## भागः - ii 10 अङ्काः

## सामान्यसंस्कृतसाहित्यपरिचयः

| | | |
|---|---|---|
| | | |
| 16. | **अधोलिखित-प्रश्नानाम् उत्तराणि लिखत- (केवलं प्रश्नत्रयम् )**<br><br>i. " दौवारिकस्य निष्ठा " इत्यस्य पाठस्य सन्दर्भग्रन्थः कः ?<br>ii. " पुरन्ध्रीपञ्चकम् " इति नाटकात् कः पाठः संकलितः ?<br>iii. " रघुवंशम्" इत्यस्याः रचनायाः लेखकः कः ?<br>iv. " मातुराज्ञा गरीयसी " अस्य पाठस्य सन्दर्भग्रन्थः कः ? | 1×3=3 |
| | | |
| 17. | **गद्य-पद्य-चम्पूकाव्यस्य च विधानां समुचितं वैशिष्ट्यं मंजूषायाः चित्वा लिखत - (केवलं प्रश्नत्रयम्)**<br><br>(i) ‘ शिशुपालवधम् ’ इति महाकाव्यस्य लेखकः----------\|<br><br>(ii) अर्जुनेन सह किरातवेशधारिणः भगवतः शिवस्य युद्धवर्णनं ---------- महाकाव्ये प्राप्यते।<br><br>(iii) महाकाव्यस्य आरम्भे नमस्कारात्मकम् आशीर्वचनात्मकम् वा --------------- भवति \|<br><br>(iv) भारतस्य स्वातंत्र्यम् अधिकृत्य विलिखितं बृहत्तमं चम्पूकाव्यं ----------विद्यते ।<br><br>मञ्जूषा –<br><br>किरातार्जुनीयम् , मातृमुक्ति-मुक्तावली<br>मंगलाचरणं , माघः , | 1×3=3 |

| | | |
|---|---|---|
| | | |
| | | |
| 18. | **समुचितं मेलयाम ।**<br><br>**भाग क** — **भाग ख**<br><br>i. रूपकस्य भेदाः — (क) भवभूतिः<br>**ii.** शुद्रकः — (ख) नाट्य-शास्त्रम्<br>iii. भरत-मुनिः — (ग) दश<br>**iv.** उत्तररामचारितम् — (घ) मृच्छकटिकम् | 1×4=4 |

---